## ॥ श्रीसत्यबोधस्तोत्रम् ॥

श्रीसत्यबोधो निजकामधेनुर्मायातमःखंडनचंडभानुः ।
दुरंतपापप्रदहे कृशानुर्देयान्ममेष्टं गुरुराजसूनुः ॥ १ ॥

श्रीसत्यबोधेतिपदाभिधानः सदा विशुद्धात्मधिया समानः ।
समस्तविद्वन्निचयप्रधानो देयान्ममेष्टं विबुधान् दधानः ॥ २ ॥

रमाधिनाथार्हणवाणिजानिः स्वभक्तसंप्रापितदुःखहानिः ।
लसत्सरोजारुणनेत्रपाणिर्देयान्ममेष्टं शुभदैकवाणिः ॥ ३ ॥

भक्तेषु विन्यस्तकृपाकटाक्षो दुर्वादिविद्रावणदक्षदीक्षः ।
समीहितार्थार्पणकल्पवृक्षो देयान्ममेष्टं कृतसर्वरक्षः ॥ ४ ॥

श्रीमध्वदुग्धाब्धिविवर्धचंद्रः समस्तकल्याणगुणैकसांद्रः ।
निरंतराराधितरामचंद्रो देयान्ममेष्टं सुधियां महेंद्रः ॥ ५ ॥

निरंतरं यस्तु पठेदिमां शुभां श्रीश्रीनिवासार्पितपंचपद्यीम् ।
तस्य प्रसीदेत् गुरुराजहृद्गः सीतासमेतो नितरां रघूत्तमः ॥ ६ ॥

॥ इति श्रीनिवासाचार्य (जगन्नाथदास)कृतं श्रीसत्यबोधस्तोत्रम् ॥